श्री विष्णु पादादिकेशांतवर्णन स्तोत्रं

श्री विष्णु पादादिकेशांतवर्णन स्तोत्रं

लक्ष्मीभर्तुर्भुजाग्रे कृतवसति सितं यस्य रूपं विशालं
नीलाद्रेस्तुंगशृंगस्थितमिव रजनीनाथबिंबं विभाति |
पायान्नः पांचजन्यः स दितिसुतकुलत्रासनैः पूरयन्स्वै-
-र्निध्वानैर्नीरदौघध्वनिपरिभवदैरंबरं कंबुराजः || 1 ||

आहुर्यस्य स्वरूपं क्षणमुखमखिलं सूरयः कालमेतं
ध्वांतस्यैकांतमंतं यदपि च परमं सर्वधाम्नां च धाम |
चक्रं तच्चक्रपाणेर्दितिजतनुगलद्रक्तधाराक्तधारं
शश्वन्नो विश्ववंद्यं वितरतु विपुलं शर्म घर्मांशुशोभं || 2 ||

अव्यान्निर्घातघोरो हरिभुजपवनामर्शनाध्मातमूर्ते-
-रस्मान्विस्मेरनेत्रत्रिदशनुतिवचःसाधुकारैः सुतारः |
सर्वं संहर्तुमिच्छोररिकुलभुवनं स्फारविष्फारनादः
संयत्कल्पांतसिंधौ शरसलिलघटावार्मुचः कार्मुकस्य || 3 ||

जीमूतश्यामभासा मुहुरपि भगवद्बाहुना मोहयंती
युद्धेषूद्धूयमाना झटिति तटिदिवालक्ष्यते यस्य मूर्तिः |
सोऽसिस्त्रासाकुलाक्षत्रिदशरिपुवपुःशोणितास्वादतृप्तो
नित्यानंदाय भूयान्मधुमथनमनोनंदनो नंदको नः || 4 ||

कम्राकारा मुरारेः करकमलतलेनानुरागाद्गृहीता
सम्यग्वृत्ता स्थिताग्रे सपदि न सहते दर्शनं या परेषां |
राजंती दैत्यजीवासवमदमुदिता लोहितालेपनार्द्रा
कामं दीप्तांशुकांता प्रदिशतु दयितेवास्य कौमोदकी नः || 5 ||

यो विश्वप्राणभूतस्तनुरपि च हरेर्यानकेतुस्वरूपो
यं संचिंत्यैव सद्यः स्वयमुरगवधूवर्गगर्भाः पतंति |
चंचच्चंडोरुतुंडत्रुटितफणिवसारक्तपंकांकितास्यं
वंदे छंदोमयं तं खगपतिममलस्वर्णवर्णं सुपर्णं || 6 ||

विष्णोर्विश्वेश्वरस्य प्रवरशयनकृत्सर्वलोकैकधर्ता
सोऽनंतः सर्वभूतः पृथुविमलयशाः सर्ववेदैश्च वेद्यः |
पाता विश्वस्य शश्वत्सकलसुररिपुध्वंसनः पापहंता
सर्वज्ञः सर्वसाक्षी सकलविषभयात्पातु भोगीश्वरो नः || 7 ||

वाग्भूगौर्यादिभेदैर्विदुरिह मुनयो यां यदीयैश्च पुंसां
कारुण्यार्द्रैः कटाक्षैः सकृदपि पतितैः संपदः स्युः समग्राः |
कुंदेंदुस्वच्छमंदस्मितमधुरमुखांभोरुहां सुंदरांगीं
वंदे वंद्यामशेषैरपि मुरभिदुरोमंदिरामिंदिरां तां || 8 ||

या सूते सत्त्वजालं सकलमपि सदा सन्निधानेन पुंसो
धत्ते या तत्त्वयोगाच्चरमचरमिदं भूतये भूतजातं |
धात्रीं स्थात्रीं जनित्रीं प्रकृतिमविकृतिं विश्वशक्तिं विधात्रीं
विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि || 9 ||

येभ्योऽसूयद्भिरुच्चैः सपदि पदमुरु त्यज्यते दैत्यवर्गै-
-र्येभो धर्तुं च मूर्ध्ना स्पृहयति सततं सर्वगीर्वाणवर्गः |
नित्यं निर्मूलयेयुर्निचिततरममी भक्तिनिघ्नात्मनां नः
पद्माक्षस्यांघ्रिपद्मद्वयतलनिलयाः पांसवः पापपंकं || 10 ||

रेखा लेखादिवंद्याश्चरणतलगताश्चक्रमत्स्यादिरूपाः
स्निग्धाः सूक्ष्माः सुजाता मृदुललिततरक्षौमसूत्रायमाणाः |
दद्युर्नो मंगळानि भ्रमरभरजुषा कोमलेनाब्धिजायाः
कम्रेणाम्रेड्यमानाः किसलयमृदुना पाणिना चक्रपाणेः || 11 ||

यस्मादाक्रामतो द्यां गरुडमणिशिलाकेतुदंडायमाना-
-दाश्र्योतंती बभासे सुरसरिदमला वैजयंतीव कांता |
भूमिष्ठो यस्तथान्यो भुवनगृहबृहत्स्तंभशोभां दधौ नः
पातामेतौ पायोजोदरललिततलौ पंकजाक्षस्य पादौ || 12 ||

आक्रामद्भ्यां त्रिलोकीमसुरसुरपती तत्क्षणादेव नीतौ
याभ्यां वैरोचनींद्रौ युगपदपि विपत्संपदोरेकधाम |
ताभ्यां ताम्रोदराभ्यां मुहुरहमजितस्यांचिताभ्यामुभाभ्यां
प्राज्यैश्वर्यप्रदाभ्यां प्रणतिमुपगतः पादपंकेरुहाभ्यां || 13 ||

येभ्यो वर्णश्चतुर्थश्चरमत उदभूदादिसर्गे प्रजानां
साहस्री चापि संख्या प्रकटमभिहिता सर्ववेदेषु येषां |
प्राप्ता विश्वंभरा यैरतिविततनोर्विश्वमूर्तेर्विराजो
विष्णोस्तेभ्यो महद्भ्यः सततमपि नमोऽस्त्वंघ्रिपंकेरुहेभ्यः || 14 ||

विष्णोः पादद्वयाग्रे विमलनखमणिभ्राजिता राजते या
राजीवस्येव रम्या हिमजलकणिकालंकृताग्रा दलाली |
अस्माकं विस्मयार्हाण्यखिलजनमनः प्रार्थनीया हि सेयं
दद्यादाद्यानवद्या ततिरतिरुचिरा मंगळान्यंगुळीनां || 15 ||

यस्यां दृष्ट्वामलायां प्रतिकृतिममराः संभवंत्यानमंतः
सेंद्राः सांद्रीकृतेर्ष्यास्त्वपरसुरकुलाशंकयातंकवंतः |
सा सद्यः सातिरेकां सकलसुखकरीं संपदं साधयेन्न-
-श्चंचच्चार्वंशुचक्रा चरणनळिनयोश्चक्रपाणेर्नखाली || 16 ||

पादांभोजन्मसेवासमवनतसुरव्रातभास्वत्किरीट-
-प्रत्युप्तोच्चावचाश्मप्रवरकरगणैश्चिंतितं यद्विभाति |
नम्रांगानां हरेर्नो हरिदुपलमहाकूर्मसौंदर्यहारि-
-च्छायं श्रेयःप्रदायि प्रपदयुगमिदं प्रापयेत्पापमंतं || 17 ||

श्रीमत्यौ चारुवृत्ते करपरिमलनानंदहृष्टे रमायाः
सौंदर्याढ्येंद्रनीलोपलरचितमहादंडयोः कांतिचोरे |
सूरींद्रैः स्तूयमाने सुरकुलसुखदे सूदितारातिसंघे
जंघे नारायणीये मुहुरपि जयतामस्मदंहो हरंत्यौ || 18 ||

सम्यक् साह्यं विधातुं सममिव सततं जंघयोः खिन्नयोर्ये
भारीभूतोरुदंडद्वयभरणकृतोत्तंभभावं भजेते |
चित्तादर्शं निधातुं महितमिव सतां ते समुद्रायमाने
वृत्ताकारे विधत्तां ह्यदि मुदमजितस्यानिशं जानुनी नः || 19 ||

देवो भीतिं विधातुः सपदि विदधतौ कैटभाख्यं मधुं चा-
-प्यारोप्यारूढगर्वावधिजलधि ययोरादिदैत्यौ जघान |
वृत्तावन्योन्यतुल्यौ चतुरमुपचयं बिभ्रतावभ्रनीला-
-वूरू चारू हरेस्तौ मुदमतिशयिनीं मानसे नो विधत्तां || 20 ||

पीतेन द्योतते यच्चतुरपरिहितेनांबरेणात्युदारं
जातालंकारयोगं जलमिव जलधेर्बाडबाग्निप्रभाभिः |
एतत्पातित्यदान्नो जघनमतिघनादेनसो माननीयं
सातत्येनैव चेतोविषयमवतरत्पातु पीतांबरस्य || 21 ||

यस्या दाम्ना त्रिधाम्नो जघनकलितया भ्राजतेऽंगं यथाब्धे-
-र्मध्यस्थो मंदराद्रिर्भुजगपतिमहाभोगसन्नद्धमध्यः |
कांची सा कांचनाभा मणिवरकिरणैरुल्लसद्भिः प्रदीप्ता
कल्यां कळ्याणदात्रीं मम मतिमनिशं कम्ररूपां करोतु || 22 ||

उन्नम्रं कम्रमुच्चैरुपचितमुदभूद्यत्र पत्रैर्विचित्रैः
पूर्वं गीर्वाणपूज्यं कमलजमधुपस्यास्पदं तत्पयोजं |
यस्मिन्नीलाश्मनीलैस्तरलरुचिजलैः पूरिते केलिबुद्ध्या
नालीकाक्षस्य नाभीसरसि वसतु नश्चित्तहंसश्चिराय || 23 ||

पातालं यस्य नालं वलयमपि दिशां पत्रपंक्तीर्नगेंद्रा-
-न्विद्वांसः केसरालीर्विदुरिह विपुलां कर्णिकां स्वर्णशैलं |
भूयाद्गायत्स्वयंभूमधुकरभवनं भूमयं कामदं नो
नालीकं नाभिपद्माकरभवमुरु तन्नागशय्यस्य शौरेः || 24 ||

आदौ कल्पस्य यस्मात् प्रभवति विततं विश्वमेतद्विकल्पैः
कल्पांते यस्य चांतः प्रविशति सकलं स्थावरं जंगमं च |
अत्यंताचिंत्यमूर्तेश्चिरतरमजितस्यांतरिक्षस्वरूपे
तस्मिन्नस्माकमंतःकरणमतिमुदा क्रीडतात्क्रोडभागे || 25 ||

कांत्यंभःपूरपूर्णे लसदसितवलीभंगभास्वत्तरंगे
गंभीराकारनाभीचतुरतरमहावर्तशोभिन्युदारे |
क्रीडत्वानद्धहेमोदरनहनमहाबाडबाग्निप्रभाढ्ये
कामं दामोदरीयोदरसलिलनिधौ चित्तमत्स्यश्चिरं नः || 26 ||

नाभीनालीकमूलादधिकपरिमळोन्मोहितानामलीनां
माला नीलेव यांती स्फुरति रुचिमती वक्त्रपद्मोन्मुखी या |
रम्या सा रोमराजिर्महितरुचिकरी मध्यभागस्य विष्णो-
-श्चित्तस्था मा विरंसीच्चिरतरमुचितां साधयंती श्रियं नः || 27 ||

संस्तीर्णं कौस्तुभांशुप्रसरकिसलयैर्मुग्धमुक्ताफलाढ्यं
श्रीवत्सोल्लासि फुल्लप्रतिनववनमालांकि राजद्भुजांतं |
वक्षः श्रीवृक्षकांतं मधुकरनिकरश्यामलं शार्ङ्गपाणेः
संसाराध्वश्रमार्तैरुपवनमिव यत्सेवितं तत्प्रपद्ये || 28 ||

कांतं वक्षो नितांतं विदधदिव गलं कालिमा कालशत्रो-
-रिंदोर्बिंबं यथांको मधुप इव तरोर्मंजरीं राजते यः |
श्रीमान्नित्यं विधेयादविरलमिलितः कौस्तुभश्रीप्रतानैः
श्रीवत्सः श्रीपतेः स श्रिय इव दयितो वत्स उच्चैःश्रियं नः || 29 ||

संभूयांभोधिमध्यात्सपदि सहजया यः श्रिया संनिधत्ते
नीले नारायणोरःस्थलगगनतले हारतारोपसेव्ये |
आशाः सर्वाः प्रकाशा विदधदपिदधच्चात्मभासान्यतेजां-
-स्याश्चर्यस्याकरो नो द्युमणिरिव मणिः कौस्तुभः सोऽस्तु भूत्यै || 30 ||

या वायावानुकूल्यात्सरति मणिरुचा भासमानाऽसमाना
साकं साकंपमंसे वसति विदधती वासुभद्रं सुभद्रं |
सारं सारंगसंघैर्मुखरितकुसुमा मेचकांता च कांता
माला मालालितास्मान्न विरमतु सुखैर्योजयंती जयंती || 31 ||

हारस्योरुप्रभाभिः प्रतिनववनमालांशुभिः प्रांशुरूपैः
श्रीभिश्चाप्यंगदानां कबलितरुचि यन्निष्कभाभिश्च भाति |
बाहुल्येनैव बद्धांजलिपुटमजितस्याभियाचामहे त-
-द्वंधार्तिं बाधतां नो बहुविहतिकरीं बंधुरं बाहुमूलं || 32 ||

विश्वत्राणैकदीक्षास्तदनुगुणगुणक्षत्रनिर्माणदक्षाः
कर्तारो दुर्निरूपस्फुटगुणयशसां कर्मणामद्भुतानां |
शार्ङ्गं बाणं कृपाणं फलकमरिगदे पद्मशंखौ सहस्रं
बिभ्राणाः शस्त्रजालं मम दधतु हरेर्बाहवो मोहहानिं || 33 ||

कंठाकल्पोद्गतैर्यः कनकमयलसत्कुंडलोत्थैरुदारै-
-रुद्योतैः कौस्तुभस्याप्युरुभिरुपचितश्चित्रवर्णो विभाति |
कंठाश्लेषे रमायाः करवलयपदैर्मुद्रिते भद्ररूपे
वैकुंठीयेऽत्र कंठे वसतु मम मतिः कुंठभावं विहाय || 34 ||

पद्मानंदप्रदाता परिलसदरुणश्रीपरीताग्रभागः
काले काले च कंबुप्रवरशशधरापूरणे यः प्रवीणः |
वक्त्राकाशांतरस्थस्तिरयति नितरां दंततारौघशोभां
श्रीभर्तुर्दंतवासोद्युमणिरघतमोनाशनायास्त्वसौ नः || 35 ||

नित्यं स्नेहातिरेकान्निजकमितुरलं विप्रयोगाक्षमा या
वक्त्रेंदोरंतराले कृतवसतिरिवाभाति नक्षत्रराजिः |
लक्ष्मीकांतस्य कांताकृतिरतिविलसन्मुग्धमुक्तावलिश्री-
-र्दंताली संततं सा नतिनुतिनिरतानक्षतान्रक्षतान्नः || 36 ||

ब्रह्मन्ब्रह्मण्यजिह्मां मतिमपि कुरुषे देव संभावये त्वां
शंभो शक्र त्रिलोकीमवसि किममरैर्नारदाद्याः सुखं वः |
इत्थं सेवावनम्रं सुरमुनिनिकरं वीक्ष्य विष्णोः प्रसन्न-
-स्यास्येंदोरास्रवंती वरवचनसुधाह्लादयेन्मानसं नः || 37 ||

कर्णस्थस्वर्णकम्रोज्ज्वलमकरमहाकुंडलप्रोतदीप्य-
-न्माणिक्यश्रीप्रतानैः परिमिलितमलिश्यामलं कोमलं यत् |
प्रोद्यत्सूर्यांशुराजन्मरकतमुकुराकारचोरं मुरारे-
-र्गाढामागामिनीं नः शमयतु विपदं गंडयोर्मंडलं तत् || 38 ||

वक्त्रांभोजे लसंतं मुहुरधरमणिं पक्वबिंबाभिरामं
दृष्ट्वा द्रष्टुं शुकस्य स्फुटमवतरतस्तुंडदंडायते यः |
घोणः शोणीकृतात्मा श्रवणयुगलसत्कुंडलोस्रैर्मुरारेः
प्राणाख्यस्यानिलस्य प्रसरणसरणिः प्राणदानाय नः स्यात् || 39 ||

दिक्कालौ वेदयंतौ जगति मुहुरिमौ संचरंतौ रवींदू
त्रैलोक्यालोकदीपावभिदधति ययोरेव रूपं मुनींद्राः |
अस्मानब्जप्रभे ते प्रचुरतरकृपानिर्भरं प्रेक्षमाणे
पातामाताम्रशुक्लासितरुचिरुचिरे पद्मनेत्रस्य नेत्रे || 40 ||

पातात्पातालपातात्पतगपतिगतेर्भ्रूयुगं भुग्नमध्यं
येनेषच्चालितेन स्वपदनियमिताः सासुरा देवसंघाः |
नृत्यल्ललाटरंगे रजनिकरतनोरर्धखंडावदाते
कालव्यालद्वयं वा विलसति समया वालिकामातरं नः || 41 ||

लक्ष्माकारालकालिस्फुरदलिकशशांकार्धसंदर्शमील-
-न्नेत्रांभोजप्रबोधोत्सुकनिभृततरालीनभृंगच्छटाभे |
लक्ष्मीनाथस्य लक्ष्यीकृतविबुधगणापांगबाणासनार्ध-
-च्छाये नो भूरिभूतिप्रसवकुशलते भ्रूलते पालयेतां || 42 ||

रूक्षस्मारेक्षुचापच्युतशरनिकरक्षीणलक्ष्मीकटाक्ष-
-प्रोत्फुल्लत्पद्ममालाविलसितमहितस्फाटिकैशानलिंगं |
भूयाद्भूयो विभूत्यै मम भुवनपतेर्भ्रूलताद्वंद्वमध्या-
-दुत्थं तत्पुंड्रमूर्ध्वं जनिमरणतमःखंडनं मंडनं च || 43 ||

पीठीभूतालकांतं कृतमकुटमहादेवलिंगप्रतिष्ठे
लालाटे नाट्यरंगे विकटतरतटे कैटभारेश्चिराय |
प्रोद्भाट्यैवात्मतंद्रीप्रकटपटकुटीं प्रस्फुरंतीं स्फुटांगं
पट्वीयं भावनाख्यां चटुलमतिनटी नाटिकां नाटयेन्नः || 44 ||

मालालीवालिधाम्नः कुवलयकलिता श्रीपतेः कुंतलाली
कालिंद्यारुह्य मूर्ध्नो गलति हरशिरःस्वर्धुनीस्पर्धया नु |
राहुर्वा याति वक्त्रं सकलशशिकलाभ्रांतिलोलांतरात्मा
लोकैरालोक्यते या प्रदिशतु सततं साखिलं मंगळं नः || 45 ||

सुप्ताकाराः प्रसुप्ते भगवति विबुधैरप्यदृष्टस्वरूपाः
व्याप्तव्योमांतरालास्तरलमणिरुचा रंजिताः स्पष्टभासः |
देहच्छायोद्गमाभा रिपुवपुरगुरुप्लोषरोषाग्निधूम्याः
केशाः केशिद्विषो नो विदधतु विपुलक्लेशपाशप्रणाशं || 46 ||

यत्र प्रत्युप्तरत्नप्रवरपरिलसद्भूरिरोचिष्प्रतान-
-स्फूर्त्या मूर्तिर्मुरारेर्द्युमणिशतचितव्योमवद्दुर्निरीक्ष्या |
कुर्वत्पारेपयोधि ज्वलदकृशशिखाभास्वदौर्वाग्निशंकां
शश्वन्नः शर्म दिश्यात्कलिकलुषतमःपाटनं तत्किरीटं || 47 ||

भ्रांत्वा भ्रांत्वा यदंतस्त्रिभुवनगुरुरप्यब्दकोटीरनेकाः
गंतुं नांतं समर्थो भ्रमर इव पुनर्नाभिनालीकनालात् |
उन्मज्जन्नूर्जितश्रीस्त्रिभुवनमपरं निर्ममे तत्सदृक्षं
देहांभोधिः स देयान्निरवधिरमृतं दैत्यविद्वेषिणो नः || 48 ||

मत्स्यः कूर्मो वराहो नरहरिणपतिर्वामनो जामदग्न्यः
काकुत्स्थः कंसघाती मनसिजविजयी यश्च कल्किर्भविष्यन् |
विष्णोरंशावतरा भुवनहितकरा धर्मसंस्थापनार्थाः
पायासुर्मां त एते गुरुतरकरुणाभारखिन्नाशया ये || 49 ||

यस्माद्वाचो निवृत्ताः सममपि मनसा लक्षणामीक्षमाणाः
स्वार्थालाभात्परार्थव्यपगमकथनश्लाघिनो वेदवादाः |
नित्यानंदं स्वसंविन्निरवधिविमलस्वांतसंक्रांतबिंब-
-च्छायापत्यापि नित्यं सुखयति यमिनो यत्तदव्यान्महो नः || 50 ||

आपादादा च शीर्षाद्वपुरिदमनघं वैष्णवं यः स्वचित्ते
धत्ते नित्यं निरस्ताखिलकलिकलुष संततांतः प्रमोदं |
जुह्वज्जिह्वाकृशानौ हरिचरितहविः स्तोत्रमंत्रानुपाठै-
-स्तत्पादांभोरुहाभ्यां सततमपि नमस्कुर्महे निर्मलाभ्यां || 51 ||

मोदात्पादादिकेशस्तुतिमितिरचितां कीर्तयित्वा त्रिधाम्नः
पादाब्जद्वंद्वसेवासमयनतमतिर्मस्तकेनानमेद्यः |
उन्मुच्यैवात्मनैनोनिचयकवचकं पंचतामेत्य भानो-
-र्बिंबांतर्गोचरं स प्रविशति परमानंदमात्मस्वरूपं || 52 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्री विष्णु पादादिकेशांतवर्णण स्तोत्रं |